इयम् आकाशवाणी

दिनाङ्क: 27.03.2026 प्रात: - 06:55

अथ वार्ताः

GOVT-LPG:

देशस्य पेट्रोलियम् एल्. पी. जी. इत्येतयोः आपूर्ति-स्थितिः पूर्णतया सुरक्षिता नियन्त्रिता च अस्तीति सर्वकारः पुनरुक्तवान्। देशे चतुस्सप्ततिदिवसाम् सञ्चय-क्षमता अस्ति। पेट्रोलियम-प्राकृतिकग्यास् इत्यस्य मन्त्रालयः अवदत् यत्, सर्वेषु इन्धन-निर्गमस्थानेषु पर्याप्त-आपूर्तिः अस्ति, देशे कुत्रापि पेट्रोल्, डीज़ल्, एल्. पी. जी. इत्येतेषाम् अभावः नास्ति। मंत्रालयः ह्यः सूचितवान् यत् भारतस्य देशीय-शोधनागारस्य उत्पादनं चत्वारिंशत् प्रतिशतं वर्धितम् अस्ति, येन प्रतिदिनं एल्. पी. जी इत्यस्य उत्पादनं पञ्चाशत् सहस्र-मेट्रिक्-टन् परिमितं यावत् भवति, यद्धि देशस्य आवश्यकतायाः षष्टिः प्रतिशतात् अधिकम् अस्ति। प्रशासनम् अवदत् यत्, प्रायः पूर्णैक- मासस्य आपूर्तिः दृढतया व्यवस्थिता अस्ति।

रिजिजूः पश्चिम-एशिया-सङ्कटे

संसदीयकार्यमन्त्री किरेन-रिजीजूः अवदत् यत् पश्चिम-एशिया-सङ्कटकाले अपि प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे भारतस्य अर्थव्यवस्था आत्यन्तिकतया उत्तमं कार्यं करोतीति। ह्यः नवदेहल्यां एकस्य वार्ता-वाहिन्याः शिखरसम्मेलनं सम्बोधयन् श्रीरिजिजूः अवदत् यत् भारतं स्वस्य ऊर्जा-संसाधनानां कृते अन्यदेशान् आश्रयति परमपि स्वस्य ऊर्जा-सङ्कटकालस्य निर्वहणं सम्यक् करोति। श्रीरिजिजुः इत्यपि अधोरेखितवान् यत् भारतीय-नौकाः होर्मुज़्-जलसंधिमार्गेण सुरक्षितरूपेण निरन्तरं गच्छन्तीति।

जयशङ्कर जी7 एफएमएमः

विदेश-कार्यमन्त्री डा. एस्. जयशङ्करः ह्यः जीसप्तेत्यस्य विदेशमन्त्रिमण्डलस्य सत्रे यू. एन्. एस्. सी. इत्यस्य परिष्काराणां, शान्तिरक्षा-कार्याणां सुव्यवस्थिततायाः, मानवीय-आपूर्तिशृङ्खलायाः निर्माणस्य च अत्यावश्यकतायाः विषये अवधानं दत्तवान्। फ्रान्स्-देशस्य अब्बाये देस्-वाक्स्-दे-सेर्ने इत्यत्र जी7 एफ्. एम्. एम्. इति आयोज्यते। डा. जयशङ्करः सामाजिक-प्रसार-माध्यमे अवदत् यत् सः वैश्विक-शासनपरिष्कारेति विषये अवददिति।

पश्चिम एशिया-संघर्षः

पश्चिम-एशिया-सङ्घर्षः गत-कतिपयेषु होरासु तीव्रः अभवत्, यत्र इस्रायल-देशः इरान्-देशस्य अन्तः नूतनानि आक्रमणानि, सम्पूर्णं लेबनान्-देशं यावच्च विस्तारयदिति सूचनास्ति। इस्रायल-देशस्य अधिकारिणः अवदन्

यत् तेषां सैनिकाः मध्य-इरानस्य इस्फ़हान्-नगरे आक्रमणानि कृतवन्तः इति, अपि च ईरान्-देशस्य इस्लामिक्-रिवोल्यूषनरी-गार्ड्-कार्प्स् इत्यस्य नौसेना-सेनापतिः अलीरेज़ा तङ्गसिरी इत्येषः अन्यैः वरिष्ठैः नौसेनाधिकारिभिः सह रात्रौ आक्रमणे मारितः इति उक्तवन्तः।

ट्रम्प-होर्मुज

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन ईरान्-देशस्य होर्मुज्-जलसंधिं उद्घाटयितुं एप्रिल्-मासस्य षड्- दिनाङ्कपर्यन्तस्य समयसीमा विस्तारितास्ति। डोनाल्ड् ट्रम्प् इत्यनेन सामाजिक-माध्यमे एतत् वक्तव्यं दत्तम्। सः अवदत् यत् सः इरान्-देशस्य ऊर्जा-केन्द्राणां विस्फोटनं स्थगयिष्यतीति।

नेपाल-प्रधानमन्त्रीः

नेपालदेशस्य राष्ट्रिय-स्वतन्त्रेति दलस्य नेता बालेन्द्रशाहः अद्य प्रधानमन्त्रीरूपेण शपथग्रहणं करिष्यति। शपथग्रहणम् काठमाण्डू-नगरस्य शीतल् निवास्-नगरस्य राष्ट्रपति-कार्यालये स्थानीयसमयानुसारम् अपराह्णे सार्धद्वादशवादने प्रायः भविष्यति। बालेन्द्रशाहः ह्यः आर्. एस्. पीति संसदीयदलस्य नेतृत्वेन निर्वाचितः, येन नेपालस्य आयुषा कनिष्ठतमः निर्वाचितः प्रधानमन्त्री भविष्यतीति निश्चितमस्ति।

भारतीय-दूतावासः-यू. ए. ई

यू. ए. ई. मध्ये भारतीय-दूतावासः ह्यः अबुधाबी-नगरे एकस्य भारतीय-नागरिकस्य दुःखद-मृत्योः विषये शोकं प्रकटितवान्। सामाजिक-माध्यमे दूतावासः अवदत् यत् दुर्भाग्यपूर्ण-घटनायां भग्नावशेषस्य पतनेन मृत्युः अभवदिति।

यू पी-रामनवमीः

उत्तरप्रदेशे अद्य रामनवमी-पर्व धार्मिकोत्साहेन आचर्यते। उत्सवस्य प्रमुखं आकर्षणं अयोध्यायाम् अस्ति यत्र श्रीरामजन्मभूमि-मन्दिरे सूर्य-स्नानम् भविष्यति, यस्य प्रत्यक्षप्रसारणं दूरदर्शनेन भविष्यति। अयोध्यायां रामनवमी-उत्सवाय सहस्रशः भक्ताः समागताः सन्ति, जनाः विभिन्नेषु मन्दिरेषु भगवतः रामस्य दर्शनात् पूर्वं सरयू-नद्यां, रामकीपैडी इत्यत्र च स्नानम् कुर्वन्तः सन्ति। भगवतः रामस्य जन्मदिनम् आचरितुं अयोध्यायाः अधिकानि मन्दिराणि भव्यरूपेण अलङ्कृतानि सन्ति। श्री रामजन्मभूमि-मन्दिरे, प्रातःकाले भगवतः रामस्य अभिषेकानन्तरं, सूर्य-तिलकः गर्भगृहे मध्याह्ने द्वादश- वादने भविष्यति।

फ़ुटबाल-सेफ़ः

दक्षिण-एशियन्-फुट्बाल्-फ़ेडरेशन् इत्यस्मिन्, एस्. ए. एफ्. एफ्. अण्डर-20-च्याम्पियन्शिप् इति क्रीडायां, भारतं, ह्यः माल्दीव्स्-देशस्य माले-नगरस्य नेशनल्-फुट्बाल्-क्रीडाङ्गणे पाकिस्तान्-देशं विरुध्य त्रि-शून्याङ्कैः विजयं प्राप्य स्वस्य अभियानस्य आरम्भम् अकरोत्।

।। इति वार्ताः।।